# नारायणोपनिषत्

## narayaṇa upaniśad

ॐ सह नाववतु।

om saha nāvavatu।

सह नौ भुनक्तु।

saha nau bhunaktu।

सह वीर्यं करवावहै।

saha vīryaṁ karavāvahai ।

तेजस्वि नावधीतमस्तु मा विद्विषावहै।

tejasvi nāvadhītamastu mā vidviṣāvahai।

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ॥

ॐ अथ पुरुषो ह वै नारयणोऽकामयत प्रजाः सृजेयेति। नारायणात्प्राणो जायते।

om atha puruṣo ha vai nārayaṇo'kāmayata prajāḥ sṛjeyeti ।

nārāyaṇātprāṇo jāyate।

मनः सर्वेन्द्रियाणि च। खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी।

manaḥ sarvendriyāṇi ca। khaṁ vāyurjyotirāpaḥ pṛthivī viśvasya dhāriṇī।

नारायणाद्-ब्रह्मा जायते। नारायणाद् - रुद्रो जायते।

nārāyaṇād - brahmā jāyate। nārāyaṇād - rudro jāyate।

नारायणादिन्द्रो जायते। नारायणात्प्रजापतयः प्रजायन्ते।

nārāyaṇādindro jāyate। nārāyaṇātprajāpatayaḥ prajāyante।

नारायणाद्द्वादशादित्या रुद्रा वसवस्सर्वाणि च छन्दाग्ंसि।

nārāyaṇāddvādaśādityā rudrā vasavassarvāṇi ca chandāgṁsi।

नारायणादेव समुत्पद्यन्ते। नारायणे प्रवर्तन्ते।

nārāyaṇādeva samutpadyante| nārāyaṇe pravartante|

नारायणे प्रलीयन्ते।

nārāyaṇe pralīyante|

ओम्। अथ नित्यो नारायणः। ब्रह्मा नारायणः।

om| atha nityo nārāyaṇaḥ| brahmā nārāyaṇaḥ|

शिवश्च नारायणः। शक्रश्च नारायणः।द्यावापृथिव्यौ च नारायणः।

śivaśca nārāyaṇaḥ| śakraśca nārāyaṇaḥ| dyāvāpṛthivyau ca nārāyaṇaḥ|

कालश्च नारायणः। दिशश्च नारायणः।

kālaśca nārāyaṇaḥ| diśaśca nārāyaṇaḥ|

ऊर्ध्वश्च नारायणः। अधश्च नारायणः। अन्तर्बहिश्च नारायणः।

ūrdhvaśca nārāyaṇaḥ| adhaśca nārāyaṇaḥ| antarbahiśca nārāyaṇaḥ|

नारायण एवेदगं सर्वम्। यद्भूतं यच्च भव्यम्।

nārāyaṇa evedagṁ sarvam| yadbhūtaṁ yacca bhavyam|

निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव एको नारायणः।

niṣkalo nirañjano nirvikalpo nirākhyātaḥ śuddho deva eko nārāyaṇaḥ|

न द्वितीयोऽस्ति कश्चित्। य एवं वेद।

na dvitīyo'sti kaścit| ya evaṁ veda|

स विष्णुरेव भवति स विष्णुरेव भवति ॥

sa viṣṇureva bhavati sa viṣṇureva bhavati ||

ओमित्यग्रे व्याहरेत्।

omityagre vyāharet|

नम इति पश्चात्। नारायणायेत्युपरिष्टात्। ओमित्येकाक्षरम्।

nama iti paścāt| nārāyaṇāyetyupariṣṭāt| omityekākṣaram|

नम इति द्वे अक्षरे। नारायणायेति पञ्चाक्षराणि ॥

nama iti dve akṣare| nārāyaṇāyeti pañcākṣarāṇi ||

एतद्वै नारायणस्याष्टाक्षरं पदम्। यो ह वै नारायणस्याष्टाक्षरं पदमध्येति।

etadvai nārāyaṇasyāṣṭākṣaraṁ padam| yo ha vai nārāyaṇasyāṣṭākṣaraṁ padamadhyeti|

अनपब्रुवस्सर्वमायुरेति। विन्दते प्राजापत्यगं रायस्पोषं गौपत्यम्।

anapabruvassarvamāyureti| vindate prājāpatyagṁ rāyasposaṁ gaupatyam|

ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति। य एवं वेद ॥

tato'mṛtatvamaśnute tato'mṛtatvamaśnuta iti| ya evaṁ veda ||

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम्। अकार उकार मकार इति।

pratyagānandaṁ brahma puruṣaṁ praṇavasvarūpam| akāra ukāra makāra iti|

तानेकधा समभरत्तदेतदोमिति। यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात्।

tānekadhā samabharattadetadomiti| yamuktvā mucyate yogī janmasaṁsārabandhanāt|

ॐ नमो नारायणायेति मन्त्रोपासकः। वैकुण्ठभुवनलोकं गमिष्यति।

om namo nārāyaṇāyeti mantropāsakaḥ|
vaikuṇṭhabhuvanalokaṁ gamiṣyati|

तदिदं परं पुण्डरीकं विज्ञानघनम्। तस्मात्तदिदावन्मात्रम्।

tadidaṁ paraṁ puṇḍarīkaṁ vijñānaghanam|
tasmāttadidāvanmātram|

ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम्। सर्वभूतस्थमेकं नारायणम्।

brahmaṇyo devakīputro brahmaṇyo madhusūdanom|
sarvabhūtasthamekaṁ nārāyaṇam|

कारणरूपमकार परब्रह्मोम्। एतदथर्व शिरोयोऽधीते प्रातरधीयानो रात्रिकृतं पापं नाशयति ।

kāraṇarūpamakāra parabrahmom| etadatharva śiroyo'dhīte prātaradhīyāno rātrikṛtaṁ pāpaṁ nāśayati|

सायमधीयानो दिवसकृतं पापं नाशयति। माध्यन्दिनमादित्याभिमुखोऽधीयानः

sāyamadhīyāno divasakṛtaṁ pāpaṁ nāśayati|
mādhyandinamādityābhimukho'dhīyānaḥ

पञ्चपातकोपपातकात्प्रमुच्यते। सर्व वेद पारायण पुण्यं लभते।

pañcapātakopapātakātpramucyate| sarva veda pārāyaṇa puṇyaṁ labhate|

नारायणसायुज्यमवाप्नोति नारायण सायुज्यमवाप्नोति। य एवं वेद। इत्युपनिषत्।

nārāyaṇasāyujyamavāpnoti nārāyaṇa sāyujyamavāpnoti। ya evaṁ veda। ityupaniṣat।

ॐ सह नाववतु।

om saha nāvavatu।

सह नौ भुनक्तु।

saha nau bhunaktu।

सह वीर्यं करवावहै।

saha vīryaṁ karavāvahai ।

तेजस्वि नावधीतमस्तु मा विद्विषावहै।

tejasvi nāvadhītamastu mā vidviṣāvahai।

ॐ शान्तिः शान्तिः शान्तिः ॥

om śāntiḥ śāntiḥ śāntiḥ ।।

radiosai